विद्यात् कैतकवच्चं तत् वाराणससमुद्भवम्॥”७७
लौहप्रदीपस्य ।
“अङ्गं मूर्व्वातन्तुनिभं भूमिर्मूर्व्वादलच्छविः ।
प्रायेण वमते शुक्लां शिखां मौर्व्वी भवेत्ततः ॥
मौर्व्वाङ्गमिदमुत्कृष्टं यशःकीर्त्तिबलावहम् ॥७८॥
लिङ्गं तीक्ष्णं खरं गाढं शाणे वह्निर्व्वमेत् कणम्॥
छिनत्त्यन्यविधं लौहं वचाङ्गमिति तद्वदेत्॥७९॥
कलायपुष्पसदृशमङ्गं भूमिः सितासिता ।
कलायवच्चं जानीयात् तत्क्षते पाक इष्यते ॥८०॥
अङ्गं चम्पकपुष्पाभं भूमिः कृष्णा तथा सिता ।
शिखां शाणे वमेच्छीतं तिक्तं तस्य जलं भवेत् ।
इदं चम्पकवच्चं स्यात् सर्व्वत्र विजयप्रदम्॥८१॥
अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा ।
बलावच्चमिदं ज्ञेयं नानाभावं भवेद्द्रुतम् ॥
इत्ययं वातरोगाणां नाशने परमौषधम् ॥८२॥
अङ्गं वटारोहसमं भूमिर्व्वटदलच्छविः ।
वटवच्चमिदं ज्ञेयं खरं खड्गाधमं बुधैः ।
एतस्य स्पर्शमात्रेण नरो मुच्येत सम्पदा ॥८३॥
वंशनीलीसमा भूमिः खरधारा सिताकृतिः ।
वंशाङ्गमिति जानीयाद्वंशवृद्धिकरं परम् ॥८४॥
भूमिः शालदलाकारा अङ्गं लघु सितासितम् ।
शालाङ्ग एव खड्गः स्यात् पूज्यः सर्व्वार्थदायकः ।
अयं शाणे वमेद्वह्निं धारा चाप्यथवा भवेत्॥८५॥
भूमिः सितासिता वापि अङ्गं ज्येष्ठीसमं लघु ।
ज्येष्ठीवच्चमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः ॥
८६ ॥
पुराणजालसदृशमङ्गं भूमिः सितासिता ॥
जालवच्चमिदं पूज्यं शत्रुसम्पत्तिनाशनम् ।
यदि शाणे वमेन्नीलां शिखां वह्निं वमेच्च वा ॥
तदैष दुर्लभः खड्गो नान्यथा भयहेतुकः ॥८७॥
अङ्गं पिपीलिकाकारं भूमिर्धूम्रा तथासिता ॥
पिपीलिकाङ्ग इत्येष तत्क्षते कण्डुसम्भवः ।
स्वयं यदि भवेद्धूम्रः शाणे पूज्यतमस्तदा ॥८८॥
नलपत्रसमा भूमिरङ्गन्तत्कुसुमोपमम् ।
नलाङ्गमिति जानीयाद्भर्त्तुः सर्व्वार्थसाधकः ॥
८९ ॥
निरङ्गा निर्म्मला भूमिर्वृष्टं दृष्टं वमेद्रजः ।
दृढ़ा धारा भृशं स्थूला आघातं सहते न च ॥
रजोवच्चमिदं निन्द्यं शत्रूणां विजयावहम् ॥९०॥
कुष्माण्डबीजसदृशमङ्गं भूमिः सितासिता ॥
कुष्माण्डवच्चं जानीयात्तत्क्षते वेगनिग्रहः ॥९१॥
अङ्गं तृरोमसदृशं भूमिर्धूम्रा सितासिता ।
रोमाङ्गमिति जानीयात्तत्क्षते पिड़कोद्गमः॥९२॥
भूमिः स्नुहीदलसमा अङ्गं तत्कण्टकोपमम् ॥
धारा तीक्ष्णा रवस्तीक्ष्णो लघुमानं खरा स्पृशा।
सुधाङ्गः खड्ग इत्येष तत्क्षते दाहलङ्भमाः ॥
मुखाक्षिकर्णनासानां दाहः पाकश्च जायते ।
अयं यदि च सर्पाणां फणास्तूपरि विन्यसते ॥
फणाविदारमाप्नोति सर्पो लोटयते शिरः ।
अस्य धावनतोयेन कुष्ठरोगविनाशनम् ॥९३॥
कर्कन्धुदलपृष्ठाभा भूमिरङ्गन्तु तत्समम् ।
कर्कन्धुवच्चं जानीयात्तत्क्षते दाहनाशनम् ॥
एष खड्गाधमस्त्याज्यो जेतव्या यदि विद्विषः ॥
९४ ॥
रङ्गं वकुलपुष्पाभं भूमिस्तत्फलसन्निभा ॥
वकुलाङ्गमिदं पूज्यं शाणे सुरभिगन्धवत् ।
तन्नास्ति जगतीमध्ये यदनेन न साध्यते ॥९५॥
अङ्गं संमिश्रितं यस्मिन्न किञ्चिद्व्यक्तमीक्ष्यते ।
सर्व्वेषां दर्शनं वापि तीक्ष्णधारः खरस्वरः ॥
एष काञ्जिकवच्चः स्याद्दूयत्नादेवोपलभ्यते ।
नैनं प्राप्यापि वर्द्धन्ते शेषाश्चिचादयोऽपि च ॥
९६ ॥
भूमिः कृष्णा निरङ्गा चेद्धारा तीक्ष्णा दृढ़ापि च।
आघातं सहते घोरं रक्तं स्पर्शेन यो विशेत् ॥
प्रायेण वह्निं वमति ध्रुवं वाप्यतिघर्षणात् ।
महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः ॥
९७ ॥
अत्यन्तनिर्म्मला भूमिः शरीरं प्रतिविम्बितम् ।
धारा तीक्ष्णा खरस्तीक्ष्णः स्वच्छाङ्गं तद्विनि-
र्द्दिशेत् ॥९८॥
तस्मिन् यदा भवेद्रेखा ऊर्द्ध्वा ऋत्वाख्यकं तदा॥९९
अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥१००॥
एतत्त्रितयमुद्दिष्टं खड्गानां प्रवरं बुधैः ।
प्रायशो लभ्यते लोके यदि सर्व्वगुणावहम् ॥
इतीदं निखिलं प्रोक्तं वच्चाणां लक्षणं मया ।
प्रयत्नैर्लिखितं व्यक्तं सर्व्वेषां हितकाम्यया ॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते ।
तस्य दासो भवाम्येष प्रतिज्ञेति कृता मया ॥
द्विलिङ्गमिश्रमालोक्य मिश्राङ्गमिति निर्द्दिशेत् ।
सर्व्वेषामङ्गमालोक्य सर्व्वाङ्गमिति निर्द्दिशेत् ॥”
इति खड्गपरीक्षायामङ्गाध्यायो द्वितीयः ॥*॥
खड्गस्य रूपाणि यथा,—

“नीलीकलायकुसुमच्छविरञ्जनाभा
या चन्द्रनीलमणिकाचमणिप्रभा च ।
भूमिश्च या मरकतप्रतिमावभासा
खड्गस्य नीलमिति रूपमिदं वदन्ति ॥

तत्र चेन्निन्दिताण्यङ्गान्यरिष्टानि बहून्यपि ।
इष्यन्ते बहुदोषापि तथापि गुणवत्तरम् ॥१॥

या कालकाम्बुदमसीरसकालसर्प-
शङ्कान्धकारकचभारसमा विभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा
खड्गस्य कृष्णमिति रूपमिदं वदन्ति ॥

अत्र नेत्राणि सम्पत्त्यै अरिष्टान्यशुभानि च ।
साधारणमिदं रूपं प्राह नागार्ज्जुनो मुनिः ॥२॥

या प्रावृषेण्यनवमेकसमानवर्णा
गोमेदरत्नसदृशापि च यस्य भूमिः ।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति
भर्त्तुर्य्यशोबलधनक्षयकारणाय ॥३॥

या मन्दधूमसदृशा च शिरीषपुष्प-
तुल्या विभाति मलिनापि च खड्गभूमिः ।
नागार्ज्जुनो वदति धूम्रमिदं हि रूपं
भर्त्तुर्य्यशोबलधनाबलिवर्द्धनाय ॥४॥

द्विरूपं मिश्रितं ज्ञात्वा शङ्करं प्रवदेद्बुधः ।
त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरसञ्ज्ञितम् ॥
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तरम् ॥”
इति लौहार्णवस्य खड्गपरीक्षायां वर्णा-
ध्यायस्तृतीयः ॥ * ॥
“जातिश्चतुर्व्विधा प्रोक्ता खड्गानां या पुरा मया।
सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते ॥
शुद्धाङ्गः शुद्धवर्णश्च सुनेत्रः सुस्वरश्च यः ।
मृदुस्पर्शः सुसन्धेयस्तीक्ष्णधारो महागुणः ॥
खड्गं ब्राह्मणजातिं तं प्राह नागार्ज्जुनो मुनिः ।
अस्य क्षते भवेच्छोथो घोरः सर्व्वाङ्गगोचरः ॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते ।
अदृष्टं त्रिफलाकल्कमहर्रात्रिन्दिवोषितम् ।
मलिनत्वं न सन्धत्ते निर्म्मलं कुरुते परम् ।
तरुणादित्यकिरणस्पर्शादेव त्वयि स्थितः ॥
दहेत् सर्व्वं न तु दारं पुरुषस्य हि धारिणः ।
गायत्त्र्युच्चारमात्रेण खरतां व्रजति स्फुटम् ॥
एष खड्गवरः सर्व्वमरिष्टं नाशयेद्ध्रुवम् ।
अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत् ॥
तस्मादेष मनुष्याणां सुलभो न हि भूतले ।
दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये ॥१॥
धूम्रवर्णो महासारं तीक्ष्णधारं खरस्वरम् ।
सर्व्वाघातसहं सर्व्वनेत्रवर्णस्वराकरम् ॥
खड्गं क्षत्रियजातिं तं जानीयात् खड्गकोविदः।
अस्य क्षते भवेद्दाहस्तृषानाहो ज्वरो भ्रमः ॥
मृत्युश्च जायते शाणे वमेद्वह्निकणान् बहून् ।
संस्कारे चाप्यसंस्कारे नैर्म्मल्यं तस्य लक्ष्यते ॥
शाणेऽप्यशाणे खरता मृद्वि चात्यन्ततीक्ष्णता ।
रक्तस्पर्शनमात्रेण विशेदन्तरमन्तरम् ॥
अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते ॥२॥
नीलवर्णः कृष्णवर्णः संस्कारे निर्म्मलो भवेत् ॥
प्रायेण खरता चास्य घाततुल्यं निकृन्तति ।
वैश्यजातिरयं खड्गः क्षते त्वङ्मात्रदर्शनम् ॥
नात्युत्कृष्टो नातिहीनं सर्व्वत्रैवोपलभ्यते ॥३॥
सजलाम्भोदसङ्काशः स्थूलधारो मृदुस्वरः ॥
संस्कारे चैव मलिनः शाणे चापि खरेतरः ।
शूद्रजातिरयं खड्गः क्षते नाल्पापि वेदना ॥
दूरादेषोऽधमस्त्याज्यो यदीच्छेद्धितमात्मनः ।
प्रायशः सर्व्वलोकेषु स्वयमेवोपदृश्यते ॥४॥
द्वयोर्लक्षणमालोक्य जारजं खड्गमादिशेत् ।
त्रयाणां लक्षणैनैव त्रिजातिं खड्गमादिशेत् ।
चतुर्णां लक्षणैनैव जातिसङ्करमुच्यते ॥”
इति लौहावर्णवस्य खड्गपरीक्षायां जात्य-
ध्यायः ॥ * ॥
अथ त्रिंशन्नेत्राणां लक्षणानि ।
“चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते ।
तं चक्रनेत्रं जानीयात् भर्त्तुः सर्व्वार्थसाधनम् ॥
अनेनैकेन खड्गेन कृत्स्नां साधयते महीम् ॥१॥
प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम् ॥
यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत् ।
अयं खड्गवरो यत्र तत्रैव कमलालया ॥२॥
ऊर्द्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते ।
गदानेत्रमिदं विद्धि सर्व्वशत्रुनिसूदनम् ॥३॥
शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते ।